**अग्निवाहन** न० ६त०। छागे, "रक्तं जटाधरं वह्निं कारयेद्धूम्रवाससम्। ज्वालामालाकुलं सौम्यं त्रिनेत्रं श्मश्रुधारिणम्। चतुर्वाहुं चतुर्दन्तं देवेशं वायुसारथिम्। चतुर्भिश्छागलैर्युक्ते वायुचिह्ने रथे स्थितम्" इति पुराणे छागवाहनत्वमुक्तम्।

**अग्निविद्** पु० अग्निं विन्दते विन्द-क्विप्। अग्निहोत्रिणि साग्निके। अग्निरहस्यं वेत्तीति विद-क्विप्। अग्निरहस्यशास्त्राभिज्ञे पु०।

**अग्निविन्दु** पु० अग्नेर्विन्दुरिव। विस्फुलिङ्गे अग्निकणे।

**अग्निवीज** न० ६त०। अग्नेर्वीजे तद्रेतोजातत्वात् उपचारात् स्वर्णे। "रुद्रतेजःसमुद्भूतं हेम वीजं विभावसोरिति" स्वर्णदानमन्त्रः। तत्कथा अग्निरेतःशब्दे द्रष्टव्या। तन्त्रोक्ते रकारवर्णे "अग्निवीजं समुद्धृत्य सुखहस्तसमन्वितमिति" तन्त्रम्।

**अग्निवीर्य्य** न० अग्नेर्वीर्य्यम्। वह्निरेतसि, तत्पराक्रमे च। तद्वीर्य्यजातत्वादुपचारात् स्वर्णे। ब०। अग्नितुल्यपरक्रमवति त्रि०

**अग्निशरण** न० ६त०। अग्न्याधानगृहे अग्निहोत्रगृहे।

**अग्निशर्म्मन्** त्रि० अग्निरिव शृणाति तीव्रकोपत्वात् शृ-मनिन्। तीव्रकोपान्विते। ऋषिभेदे पु०। वाह्वादि० इञि आग्निशर्म्मिः तदपत्ये। नडादि० फक्। आग्निशर्म्मायणः तद्गोत्रापत्ये।

**अग्निशाला** स्त्री अग्नीनां शाला गृहम्। अग्न्याधानस्थाने अस्त्रा वा नपुंसकत्वम्। "हविर्धानमग्निशालं पत्नीनां सदनम्" इति वेदः।

**अग्निशिख** पु० अग्नेरिव अग्निरिव वा शिखा यस्य। कुङ्कुमवृक्षे, कुसुम्भवृक्षे, अग्नितुल्यशिखे-जाङ्गलीवृक्षे च॥ अग्नितुल्यजटावति त्रि०। अग्निशिखेव शिखाऽग्रमस्य। लाङ्गलिकावृक्षे स्त्री (विषलाङ्गला) अग्नितुल्याग्रभागे त्रि० "वाणैरग्निशिखैरिवेति" पुरा०। स्वर्णे कुसुम्भपुष्पे च न०। ६त०। अग्निज्वालायां स्त्री "शरैरग्निशिखोपमैरिति, भार०। [होमे।

**अग्निशुश्रूषा** स्त्री ६त०। वह्नेः विधानेन सेवोपयोगिनि

**अग्निशेखर** पु० अग्निरिव शेखरमग्रं यस्य। कुङ्कुमवृक्षे, कुसुमवृक्षे, जाङ्गलीवृक्षे च। अग्नितुल्याग्रवति त्रि०।

**अग्निष्टुत्** पु० अग्निःस्तूयतेऽत्र स्तु-आधारे क्विप् षत्वम्। अग्निष्टोमस्य विकृतिभूते एकाहसाध्ये यागभेदे। सामसंहिताभाष्ये संशयपूर्वकं तस्य कर्म्मान्तरमिति सायणाचार्य्येण निर्णीतम् यथा। "उक्ताग्निष्टुतमेतस्य वारवन्तीय-साम हि। रेवतीष्वृक्षु कृत्वेति श्रुतं पशु-फलाप्तये। रेवत्यादिर्गुणः कर्म्म पृथग्वा पूर्ववद् गुणः। रैवती-वारवन्तीय-सम्बन्धाख्यः पशु-प्रदः। साम्नोऽत्र फल-कर्म्मभ्यां सम्बन्धे वाक्य-भिन्नता। तेनोक्त-गुण-संयुक्तमन्यत् कर्मोच्यते फले"॥ "त्रिवृदग्निष्टोमस्तस्य वायव्यासु ऋक्षु एकविंशाग्निष्टोम-साम कृत्वा ब्रह्मवर्चस-कामो यजेत"-इत्यस्य सन्निधौ श्रूयते—"एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशु-कामोह्येतेन यजेत" इति। "अस्यायमर्थः। प्रकृतौ तृतीयसवने आर्भव—पवमानस्योपरि यज्ञायज्ञीयं साम गीयते, तेन च साम्ना अग्निष्टोमयागस्य समाप्यमानत्वादग्निष्टोम सामेत्युच्यते, तच्च प्रकृतौ "यज्ञायज्ञीयो वा अग्नये" इत्याद्याग्नेयीष्वृक्षु गीयते अस्मिंस्त्वग्निष्टुति ब्रह्मवर्चस-कामेन वायव्यास्वृक्षु तत् साम गातव्यम्, तच्च प्रकृताविवैक विंश-स्तोम-युक्तम्। पशुकामस्य तु "रेवतीर्नः सधमादे" इत्यादिषु रेवतीष्वृक्षु "वारवन्तीयं" साम गायेदिति, तत्र रेवतीनामर्चां वारवन्तीयनामकेन साम्ना यः सम्बन्धः सोऽयं पशु-फलायाग्निष्टुति विधीयते, एतस्यैवेति प्रकृत-परामर्शकेनैतच्छब्देनान्य—व्यावर्त्तकेनैवकारेण चाग्निष्टुतः समर्प्यमाणत्वात् यथा पूर्व्वाधिकरणे इन्द्रियफलाय प्रकृताग्निहोत्रे दधि-गुणोविहितः तद्वत्, इति प्राप्ते, ब्रूमः—विषमो दृष्टान्तः, दध्नोहोम-जनकत्वं न शास्त्रेण बोधनीयं तस्य लोकतोऽवगन्तुं शक्यत्वात्। फल—सम्बन्धः एकएव शास्त्रबोध्यः इति न तत्र वाक्यभेदः, इह तु रैवत्यृगाधारकवारवन्तीय-साम्नोऽग्निष्टुत्-कर्म्म-साधनत्वं फल साधनत्वं चेत्युभयस्य शास्त्रैक-बोध्यत्वाद् दुर्वारोवाक्य-भेदः तेन पशुफलकं यथोक्तगुण—विशिष्ट-कर्म्मान्तरमत्र विधीयते। एतच्छब्दः एवकारश्च विधीयमान-कर्म्मान्तर-विषयतया योजनीयौ इति"। "यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा,। अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा" इति स्मृतिः।

**अग्निष्टुभ्** पु० अग्निस्तुभ्यतेऽत्र क्विप् षत्वम्। यज्ञभेदे।

**अग्निष्टोम** पु० अग्नेः स्तोमः स्तुतिसाधनं तृचसमुदायोऽवसानेऽत्र। यागविशेषे स च यागः ताण्ड्यमहाब्राह्मणे षष्ठाध्याये "प्रजापतिरकामयत बहु स्यां प्रजायेयेति सएतमग्निष्टोममसृजत" इत्युपक्रम्य "एष वाव यज्ञोयदग्निष्टोम" इति "एकस्मा अन्यो यज्ञः कामायाह्रियते सर्व्वेभ्योऽग्निष्टोम" इति चाग्निष्टोमं स्तुत्वा "द्वादश